শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী রামানুজাষ্টকম্ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী রামানুজাষ্টকম্ ॥

রামানুজায মুনযে নম উক্তিমাত্রম্
কামাতুরোঽপি কুমতিঃ কলযন্নভীষ্টম্।
যামামনন্তি যমিনাং ভগবজ্জনানাম্
তামেব বিন্দতি গতিং তমসঃ পরস্তাৎ॥ **1**॥

সোমাবচূড সুরশেখরদুষ্করেণ
কামাতিদোঽপি তপসা ক্ষপযন্নঘানি।
রামানুজায মুনযে নম ইত্যনুকত্বা
কোবা মহীসহচরে কুরুতেনুরাগম্॥ **2**॥

রামানুজায নম ইত্যসকৃদ্গৃণীতে
যো মান মৎসর মদস্মর দূষিতোঽপি।
প্রেমাতুরঃ প্রিযতমামপহায পদ্মাং
ভূমা ভুজঙ্গ শযনস্তমনুপ্রযাতি॥ **3**॥

বামালকাসযনবাগুরিকাগৃহীতং
ক্ষেমায কিঞ্চিদপি কর্তুমনীহমানম্।
রামানুজো যতিপতির্যদি নেক্ষতে মাং
মা মামকোযমিতি মুঞ্চতি মাধবোঽপি॥ **4**॥

রামানুজেতি যদিদং বিদিতং জগত্যাং
নামাপি ন শ্রুতিসমীপমুপৈতি যেষাম্।
মা মা মদীয ইতি সদ্ভিরুপেক্ষিতাস্তে
রামানুবিদ্ধমনসো নিপতন্ত্যধোধঃ॥ **5**॥

sundararajan kidambi gmail.com

নামানুকীর্ত্য নরকার্তিহরং যদীযং
ব্ৰ্যোমাধিরোহতি পদং সতলোপি লোকঃ।
রামানুজো যতিপতির্যদি নাৱিরাসীৎ
কো যাদৃশঃ প্রভৱিতা ভৱমুত্তরীতুম্॥ **6**॥

সীমামহীধ্রপদৱিং পৃথিৱীমৱাপ্তুং
ৱৈমানিকেশ্ৱরপুরীমধিৱাসিতুম্ ৱা।
ব্ৰ্যোমাধিরোঢুমপি ন স্পৃহযন্তি নিত্যং
রামানুজাঙ্ঘ্রিযুগলং শরণং প্রপন্নাঃ॥ **7**॥

মা মা ধুনোতি মনসোঽপি ন গোচরং যৎ
ভূমাসখেন পুরুষেণ সহানুভূয।
প্রেমানুৱিদ্ধহৃদয প্রিযভক্ত লভ্যে
রামানুজাঙ্ঘ্রিকমলে রমতাং মনো মে॥ **8**॥

শ্লোকাষ্টকমিদং পুণ্যং যো ভক্ত্যা প্রত্যহং পঠেৎ।
আকারত্রযসম্পন্নঃ শোকাব্ধিং তরতি ধ্রুৱম্॥ **9**॥

॥ ইতি শ্রী রামানুজাষ্টকং সমাপ্তম্॥

sunder kidambi prapatti.com sunder kidambi